योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०३४

चतुस्त्रिंशः सर्गः ३४

ईश्वर उवाच ।

इत्थं स्थितमिदं विश्वं सदसद्देवरूपि च ।

द्वैतैक्यपदनिर्मुक्तं युक्तं द्वैतैक्यमप्यतः ।। १

चितेः कलङ्कवैरूप्यमिति संसारतां गतम् ।

अकलङ्कमसंसारि तच्चाभिन्नाद्वयात्मकम् ।। २

इयमस्मीति संप्राप्तकलङ्का चिन्निबध्यते ।

एतामेव कलां बुद्ध्वा स्वकाभिन्नां विमुच्यते ।। ३

चिदर्थाकारताभावाद्द्वित्वात्सत्त्वं समुज्झति ।

सुखादिमिलितां धत्ते न सत्यां सदिति क्षणात् ।। ४

शुद्धा निरंशा सत्या वाऽसत्या वेत्येवमादिभिः ।

विमुक्ता नामशब्दार्थैः सर्वैः सर्वात्मिकापि खम् ।। ५

सर्वं निरुपमं शान्तं मनसैतत्त्रिमार्गगम् ।

ब्रह्मेदं बृंहितं ब्रह्म शक्त्याऽऽकाशविकासया ।। ६

मनसा मनसि च्छिन्ने स्वेन्द्रियावयवात्मनि ।

सत्यालोकाज्जगज्जाले प्रच्छन्ने विलयं गते ।। ७

छिद्यते शीर्णसंसारकलना कल्पनात्मिका ।

भृष्टबीजोपमा सत्ता जीवस्य इतिनामिका ।। ८

पश्यन्ती नाम कलितोत्सृजन्ती चेत्यचर्वणाम् ।

मनोमोहाभ्रनिर्मुक्ता शरदाकाशकोशवत् ।। ९

शुद्धा चिद्भावमात्रस्था चेत्यचिच्चापलं गता ।

समस्तसामान्यवती भवतीर्णभवार्णवा ।। १०

अपुनर्भवसौषुप्तपदपाण्डित्यपीवरी ।
परमासाद्य विश्रान्ता विश्रान्ता वितते पदे ।। ११
एतत्ते मनसि क्षीणे प्रथमं कथितं पदम् ।
द्वितीयं श्रृणु विप्रेन्द्र शक्तेरस्याः सुपावनम् ।। १२
एषैव मनसोन्मुक्ता चिच्छक्तिः शान्तिशालिनी ।
सर्वज्योतिस्तमोमुक्ता विततकाशसुन्दरी ।। १३
घनसौषुप्तलेखावच्छिलान्तःसन्निवेशवत् ।
सैन्धवान्तस्थरसवद्वातान्तःस्पन्दशक्तिवत् ।। १४
कालेनायाति तत्रैव परां परिणतिं यदा ।
शून्यशक्तिरिवाकाशे परमाकाशगा तदा ।। १५
चेत्यांशोन्मुखतां नूनं त्यजत्यम्बिव चापलम् ।
वातलेखेव चलनं पुष्पलेखेव सौरभम् ।। १६
कालताकाशते त्यक्त्वा सकले सकलाकला ।
न जडा नाजडा स्फारा धत्ते सत्तामनामिकाम् ।।१७
दिक्कालाद्यनवच्छिन्नमहासत्तापदं गताम् ।
तुर्यतुर्यांशकलितामकलङ्कामनामयाम् ।। १८
कांचिदेव विशालाक्ष साक्षिवत्समवस्थिताम् ।
सर्वतः सर्वदा सर्वप्रकाशस्वादुतत्पराम् ।। १९
एषा द्वितीया पदता कथिता तव सुव्रत ।
तृतीयं श्रृणु वक्ष्यामि पदं पदविदां वर ।। २०
एषा दृक्चेत्यवलनादनामार्थापदं गता ।
ब्रह्मात्मेत्यादिशब्दार्थादतीतोदेति केवला ।। २१
स्थैर्येण कालतः स्वस्था निष्कलङ्का परात्मना ।
तुर्यातीतादिनामत्वादपि याति परं पदम् ।। २२
सा परा परमा काष्ठा प्रधानं शिवभावतः ।
चित्येका निरवच्छेदा तृतीया पावनी स्थितिः ।। २३

चिरमस्यां प्रतिष्ठायां सर्वाध्वाध्वगदूरगा ।

सा ममाप्यंग वचसां न समायाति गोचरम् ।। २४

त्रिमार्गकलनातीतमिति ते कथितं मुने ।

तिष्ठ तस्मिन्पदे नित्यमिति देवः सनातनः ।। २५

एतन्मयमिदं विश्वं मुने तन्मयवेदनात् ।

सत्यसंवेदनान्नेदं न च नेदं मुनीश्वर ।। २६

नेदं प्रवर्तते किंचिन्नेदं किचिन्निवर्तते ।

शान्तं समसमाभासं प्रथते स्वस्य कोशवत् ।। २७

अद्वैतैक्यादसंक्षोभाद्घनचेतनया तया ।

अविकारादिमत्त्वाच्च नित्यानित्यतया चिरम् ।। २८

चिद्घनत्वाच्छिशुशिलाकोशानां जगतामपि ।

मनागपि न भेदोऽस्ति सतामप्यसतामपि ।। २९

समस्तं सुशिवं शान्तमतीतं वाग्विलासतः ।

ओमित्यस्य च तन्मात्रातुर्या सा परमा गतिः ।। ३०

श्रीवाल्मीकिरुवाच ।

इत्युक्तवानमलदृक्परिणामतोऽस्मिन्

पारे पदे समुपशान्तरवाभिधाने ।

तूष्णीमतिष्ठदमुना मुनिना च सार्धं

विश्रान्तवृत्तिरथ तत्र मुहूर्तमीशः ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० परमेश्वरोपदेशो नाम चतुस्त्रिंशः सर्गः ।। ३४ ।।